श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री नारायणयतीन्द्रमहादेशिकैः अनुगृहीतम्

# ॥ आचार्यमङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. R. Thirunarayanan of Srirangam and Sri. Sundar Varadarajan of Chennai for proofreading this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यमङ्गळम् ॥

मङ्गळं श्रीनृसिंहाय कमलायै च मङ्गळम्।
विष्वक्सेनाय शठजिन्नाथाभ्यां चैव मङ्गळम्॥ १ ॥

मङ्गळं पुण्डरीकाक्षरामाभ्यां यामुनाय च।
मङ्गळं पूर्णमिश्राय भाष्यकाराय मङ्गळम्॥ २ ॥

मङ्गळं निगमान्तादिपारीणाय महात्मने।
सर्वतन्त्रस्वतन्त्राय वेदान्तगुरवे सदा॥ ३ ॥

अहोबिलमठास्थाननिर्मात्रे च सुयोगिने।
आदिवण्शठकोपाय सदा भवतु मङ्गळम्॥ ४ ॥

नृसिंहमन्त्रवेत्रे च रङ्गनाथशठारये।
सर्वत्र जयशीलाय योगिने मङ्गळं सदा॥ ५ ॥

ज्ञानानुष्ठानशीलाय बहुस्तोत्राणि तन्वते।
मङ्गळं सततं भूयात् मानृसिंहशठद्विषे॥ ६ ॥

विद्वत्समाजमान्याय गुणाष्टकमुपेयुषे।
मङ्गळं सततं भूयात् श्रीमद्रङ्गशठारये॥ ७ ॥

नृसिंहपदभक्ताय शिष्यानुग्रहकारिणे।
मङ्गळं सततं भूयाद् वीरराघवयोगिने॥ ८ ॥

श्रावण्यां हस्तनक्षत्रे मन्मथे वत्सरे शुभे।
अवतीर्णाय वेदान्तगुरवे मङ्गळं सदा॥ ९ ॥

www.prapatti.com

पूर्वाचार्यैः सुमहिते सर्वमङ्गळशोभिते।
मुक्कुर्ग्रामेऽवतीर्णाय तस्मै भव्याय मङ्गळम्॥ १० ॥

कर्माण्योपनयादीनि यथाकालं यथाविधि।
पितुः सकाशात् संप्राप तस्मै धीराय मङ्गळम्॥ ११ ॥

पुरा श्रीमुष्णनगरे यो वेदं समधीतवान्।
तस्मै शान्तस्वरूपाय यतिवर्याय मङ्गळम्॥ १२ ॥

दक्षिणद्वारकायां च सामोदं शाश्वतीः समाः।
यो वासमकरोत् तस्मै यतिराजाय मङ्गळम्॥ १३ ॥

तिल्लयम्बूर्-चक्रवर्ति-गुरुवर्यस्य सन्निधौ।
श्रुत्वाधिकृत्य श्रीभाष्यमेधमानाय मङ्गळम्॥ १४ ॥

निर्माय वेश्म श्रीकाञ्च्यां वासं कृत्वा प्रसन्नधीः।
पूजयामास हस्तीशं तस्मै प्राज्ञाय मङ्गळम्॥ १५ ॥

उज्जीवयामास जनानुपन्यासैर्मनोहरैः।
न्यासविद्योपदेष्ट्रे च नित्यश्रीर्नित्यमङ्गळम्॥ १६ ॥

गत्वा मुम्बापुरीं रम्यां मन्त्रार्थान् समुपादिशत्।
वैष्णवेभ्यः कुलीनेभ्यो यस्तस्मै नित्यमङ्गळम्॥ १७ ॥

वर्षयामास सततं रामायणकथामृतम्।
विज्ञाननिधये तस्मै यतिवर्याय मङ्गळम्॥ १८ ॥

किंनु वेङ्कटनाथोऽसाविति विद्वद्भिरीक्षितः।
हेतुभिर्विविधैस्सद्भिस्तस्मै पूज्याय मङ्गळम्॥ १९ ॥

श्रीभाष्यकारतुल्याय पञ्चाचार्यानुपेयुषे।
पुनर्भाष्यप्रचारार्थमवतीर्णाय मङ्गळम्॥ २० ॥

तीर्थमूर्तिस्थलैः श्रेष्ठे प्रसिद्धे गारुडाचले।
प्रेषमन्त्रं समासाद्य मोदते तस्य मङ्गळम्॥ २१ ॥



www.prapatti.com

वृश्चिके श्रवणे सौम्ये वत्सरे हेमलम्बिनि।
तुर्याश्रमं स्वीकृतवान् तस्मै प्रेष्ठाय मङ्गळम्॥ २२ ॥

वीरराघवयोगीन्द्रे श्रीवैकुण्ठमुपेयुषि।
प्राप्तस्थानभरायास्तु गुरुवर्याय मङ्गळम्॥ २३ ॥

अहोबिलमठास्थाने श्रीनृसिंहेन सादरम्।
अभिषिक्ताय मान्याय गुरवे नित्यमङ्गळम्॥ २४ ॥

तुर्याश्रमं समासाद्य नैमिशे मुनिसेविते।
अरक्षद् यो जनान् शिष्यान् तस्मै प्राज्ञाय मङ्गळम्॥ २५ ॥

उदारगुणसीम्ने च शिष्यक्षेमाभिकांक्षिणे।
त्रय्यन्तगुरवे तस्मै यतिराजाय मङ्गळम्॥ २६ ॥

सहस्रनामार्चनं यो द्विकालं कुरुते गुरुः।
शिष्यक्षेमैकचित्ताय तस्मै पूज्याय मङ्गळम्॥ २७ ॥

वीक्षारण्ये सरः कृत्वा प्रणम्य च रघूद्वहम्।
मुमुदे यो गुरुस्तस्मै सर्वदात्रे सुमङ्गळम्॥ २८ ॥

निर्माय गोपुरं रम्यं दुर्गमे गारुडाचले।
अर्चयामास नृहरिं तस्मै श्रेष्ठाय मङ्गळम्॥ २९ ॥

लक्ष्मीनृसिंहपादाब्जद्वन्द्वमाध्वीमधुव्रतः।
जयतात् श्रुतिचूडार्ययतीन्द्रो भुवि सन्ततम्॥ ३० ॥

योऽसौ ब्रह्मबुभुत्सूनां सौकर्यार्थं यतीश्वरः।
सर्वेषां ब्रह्मसूत्राणां रम्यान् श्लोकान् मुदाऽकरोत्॥ ३१ ॥

शारीरकाधिकरणक्रमं ज्ञानाभिकांक्षिणाम्।
अकरोत् पद्यरूपेण गुरवेऽस्मै सुमङ्गळम्॥ ३२ ॥

विशिष्टाद्वैतसिद्धान्ततत्त्वानां सङ्ग्रहं गुरुः।
प्रकाशयामास मुदा तस्मै सेव्याय मङ्गळम्॥ ३३ ॥

स्तुतीः करावलम्बाद्याः शिष्याणां भक्तिवृद्धये।
योऽकरोत् कृपया तस्मै नित्यश्रीर्नित्यमङ्गळम्॥ ३४ ॥

द्विकालं यः पठेदस्य गुरुवर्यस्य मङ्गळम्।
बुद्धिर्बलं यशो धैर्यं विद्यायुः श्रीश्च वर्धते॥ ३५ ॥

पठतां शृण्वतां नॄणां सदा क्षेमप्रदं भवेत्।
कृष्णदासेन रचितमाचार्यस्य सुमङ्गळम्॥ ३६ ॥

॥ इति आचार्यमङ्गळं संपूर्णम् ॥

www.prapatti.com